শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীশঙ্করাচার্য ৱিরচিতম্

# ॥ পৱনসুত পঞ্চরত্নম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ পৱনসুত পঞ্চরত্নম্ ॥

যত্র যত্র রঘুনাথকীর্তনং
তত্র তত্র কৃতমস্তকাঞ্জলিম্।
বাষ্পৱারিপরিপূর্ণলোচনং
মারুতিং নমত রাক্ষসান্তকম্॥

ৱীতাখিলৱিষযেচ্ছং
জাতানন্দাশ্রুপুলকমত্যচ্ছম্।
সীতাপতিদূতাদ্যং
ৱাতাত্মজমদ্য ভাৱযে হৃদ্যম্॥ **1** ॥

তরুণারুণমুখকমলম্
করুণারসপূরপূরিতাপাঙ্গম্।
সঞ্জীৱনমাশাসে
মঞ্জুলমহিমানমঞ্জনাভাগ্যম্॥ **2** ॥

শম্বরৱৈরিশরাতিগং
অম্বুজদলৱিপুললোচনোদারম্।
কম্বুগলমনিলদিষ্টং
বিম্বজ্ৱলিতোষ্ঠমেকমৱলম্বে॥ **3** ॥

দূরীকৃতসীতার্তিঃ
প্রকটীকৃতরামৱৈভৱস্ফূর্তিঃ।
দারিতদশমুখকীর্তিঃ
পুরতো মম ভাতু হনুমতোমূর্তিঃ॥ **4** ॥

ৱানরনিকরাধ্যক্ষং
    দানৱকুলকুমুদ রৱিকর সদৃক্ষম্।
দীনজনাৱনদীক্ষং
    পৱনতপঃপাকপুঞ্জমদ্রাক্ষম্॥ **5**॥

এতৎপৱনসুতস্য স্তোত্রং
    যঃ পঠতি পঞ্চরত্নাখ্যম্।
চিরমিহ নিখিলান্ভোগান্
    ভুক্ত্বা শ্রীরামভক্তিভাগ্ভৱতি॥ **6**॥

॥ ইতি পৱনসুত পঞ্চরত্নং সমাপ্তম্॥